## चुर् (चुराना) "लट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | चोरयति | चोरयत: | चोरयन्ति |
| मध्यमपुरुष: | चोरयसि | चोरयथ: | चोरयथ |
| उत्तमपुरुष: | चोरयामि | चोरयाव: | चोरयाम: |

## चुर् (चुराना) "लोट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | चोरयतु | चोरयताम् | चोरयन्तु |
| मध्यमपुरुष: | चोरय | चोरयतम् | चोरयत |
| उत्तमपुरुष: | चोरयाणि | चोरयाव | चोरयाम |

## चुर् (चुराना) "लङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अचोरयत् | अचोरयताम् | अचोरयन् |
| मध्यमपुरुष: | अचोरय: | अचोरयतम् | अचोरयत |
| उत्तमपुरुष: | अचोरयम् | अचोरयाव | अचोरयाम |

## चुर् (चुराना) "विधिलिङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | चोरयेत् | चोरयेताम् | चोरयेयु: |
| मध्यमपुरुष: | चोरये: | चोरयेतम् | चोरयेत |
| उत्तमपुरुष: | चोरयेयम् | चोरयेव | चोरयेम |

## चुर् (चुराना) "लृट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | चोरयिष्यति | चोरयिष्यत: | चोरयिष्यन्ति |
| मध्यमपुरुष: | चोरयिष्यसि | चोरयिष्यथ: | चोरयिष्यथ |
| उत्तमपुरुष: | चोरयिष्यामि | चोरयिष्याव: | चोरयिष्याम: |

## स्पृश् (छूना) "लट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्पृशति | स्पृशतः | स्पृशन्ति |
| मध्यमपुरुषः | स्पृशसि | स्पृशथः | स्पृशथ |
| उत्तमपुरुषः | स्पृशामि | स्पृशावः | स्पृशामः |

## स्पृश् (छूना) "लोट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्पृशतु | स्पृशताम् | स्पृशन्तु |
| मध्यमपुरुषः | स्पृश | स्पृशतम् | स्पृशत |
| उत्तमपुरुषः | स्पृशानि | स्पृशाव | स्पृशाम |

## स्पृश् (छूना) "लङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्पृशत् | अस्पृशताम् | अस्पृशन् |
| मध्यमपुरुषः | अस्पृशः | अस्पृशतम् | अस्पृशत |
| उत्तमपुरुषः | अस्पृशम् | अस्पृशाव | अस्पृशाम |

## स्पृश् (छूना) "विधिलिङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्पृशेत् | स्पृशेताम् | स्पृशेयुः |
| मध्यमपुरुषः | स्पृशेः | स्पृशेतम् | स्पृशेत |
| उत्तमपुरुषः | स्पृशेयम् | स्पृशेव | स्पृशेम |

## स्पृश् (छूना) "लृट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्प्रक्ष्यति | स्प्रक्ष्यतः | स्प्रक्ष्यन्ति |
| मध्यमपुरुषः | स्प्रक्ष्यसि | स्प्रक्ष्यथः | स्प्रक्ष्यथ |
| उत्तमपुरुषः | स्प्रक्ष्यामि | स्प्रक्ष्यावः | स्प्रक्ष्यामः |

## (आत्मनेपदी)

### लभ् (पाना) "लट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभते | लभेते | लभन्ते |
| मध्यमपुरुष: | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुष: | लभे | लभावहे | लभामहे |

### लभ् (पाना) "लङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अलभत | अलभेताम् | अलभन्त |
| मध्यमपुरुष: | अलभथा: | अलभेथाम् | अलभध्वम् |
| उत्तमपुरुष: | अलभे | अलभावहि | अलभामहि |

### लभ् (पाना) "लृट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| मध्यमपुरुष: | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तमपुरुष: | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

### लभ् (पाना) "लोट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभताम् | लभेताम् | लभन्ताम् |
| मध्यमपुरुष: | लभस्व | लभेथाम् | लभध्वम् |
| उत्तमपुरुष: | लभै | लभावहै | लभामहै |

### लभ् (पाना) "विधिलिङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभेत | लभेयाताम् | लभेरन् |
| मध्यमपुरुष: | लभेथा: | लभेयाथाम् | लभेध्वम् |
| उत्तमपुरुष: | लभेय | लभेवहि | लभेमहि |

## मुद् “लट्” लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | मोदते | मोदेते | मोदन्ते |
| मध्यमपुरुष: | मोदसे | मोदेथे | मोदध्वे |
| उत्तमपुरुष: | मोदे | मोदावहे | मोदामहे |

## मुद् “लङ्” लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अमोदत | अमोदेताम् | आमोदन्त |
| मध्यमपुरुष: | अमोदथा: | अमोदेथाम् | अमोदध्वम् |
| उत्तमपुरुष: | अमोदे | अमोदावहि | अमोदामहि |

## मुद् “लृट्” लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | मोदिष्यते | मोदिष्येते | मोदिष्यन्ते |
| मध्यमपुरुष: | मोदिष्यसे | मोदिष्येथे | मोदिष्यध्वे |
| उत्तमपुरुष: | मोदिष्ये | मोदिष्यावहे | मोदिष्यामहे |

## मुद् “लोट्” लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | मोदताम् | मोदेताम् | मोदन्ताम् |
| मध्यमपुरुष: | मोदस्व | मोदेथाम् | मोदध्वम् |
| उत्तमपुरुष: | मोदै | मोदावहै | मोदामहै |

## मुद् “विधिलिङ्” लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | मोदेत | मोदेयाताम् | मोदेरन् |
| मध्यमपुरुष: | मोदेथा: | मोदेयाथाम् | मोदेध्वम् |
| उत्तमपुरुष: | मोदेय | मोदेवहि | मोदेमहि |

## सेव् "लट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुष: | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुष: | सेवे | सेवावहे | सेवामहे |

## सेव् "लङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुष: | असेवथा: | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुष: | असेवे | असेवावहि | असेवामहि |

## सेव् "लृट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुष: | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुष: | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## सेव् "लोट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यमपुरुष: | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तमपुरुष: | सेवै | सेवावहै | सेवामहै |

## सेव् "विधिलिङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवेत | सेवेयाताम् | सेवेरन् |
| मध्यमपुरुष: | सेवेथा: | सेवेयाथाम् | सेवेध्वम् |
| उत्तमपुरुष: | सेवेय | सेवेवहि | सेवेमहि |

## याच् "लट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | याचते | याचेते | याचन्ते |
| मध्यमपुरुष: | याचसे | याचेथे | याचध्वे |
| उत्तमपुरुष: | याचे | याचावहे | याचामहे |

## याच् "लोट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | याचताम् | याचेताम् | याचन्ताम् |
| मध्यमपुरुष: | याचस्व | याचेथाम् | याचध्वम् |
| उत्तमपुरुष: | याचै | याचावहै | याचामहै |

## याच् "लङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अयाचत | अयाचेताम् | अयाचन्त |
| मध्यमपुरुष: | अयाचथा: | अयाचेथाम् | अयाचध्वम् |
| उत्तमपुरुष: | अयाचे | अयाचावहि | अयाचामहि |

## याच् "विधिलिङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | याचेत | याचेयाताम् | याचेरन् |
| मध्यमपुरुष: | याचेथा: | याचेयाथाम् | याचेध्वम् |
| उत्तमपुरुष: | याचेय | याचेवहि | याचेमहि |

## याच् "लृट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | याचिष्यते | याचिष्येते | याचिष्यन्ते |
| मध्यमपुरुष: | याचिष्यसे | याचिष्येथे | याचिष्यध्वे |
| उत्तमपुरुष: | याचिष्ये | याचिष्यावहे | याचिष्यामहे |

## कृ (करना) "लट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | करोति | कुरुत: | कुर्वन्ति |
| मध्यमपुरुष: | करोषि | कुरुथ: | कुरुथ |
| उत्तमपुरुष: | करोमि | कुर्व: | कुर्म: |

## कृ (करना) "लोट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुष: | कुरु | कुरुतम् | कुरुत |
| उत्तमपुरुष: | करवाणि | करवाव | करवाम |

## कृ (करना) "लङ् " लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुष: | अकरो: | अकुरुतम् | अकुरुत |
| उत्तमपुरुष: | अकरवम् | अकुर्व | अकुर्म |

## कृ (करना) "विधिलिङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | कुर्यात् | कुर्याताम् | कुर्यु: |
| मध्यमपुरुष: | कुर्या: | कुर्यातम् | कुर्यात |
| उत्तमपुरुष: | कुर्याम् | कुर्याव | कुर्याम |

## कृ (करना) "लृट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | करिष्यन्ति | करिष्यत: | करिष्यन्ति |
| मध्यमपुरुष: | करिष्यसि | करिष्यथ: | करिष्यथ |
| उत्तमपुरुष: | करिष्यामि | करिष्याव: | करिष्याम: |

## कृ (करना)आत्मनेपद "लट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुरुते | कुर्वाते | कुर्वते |
| मध्यमपुरुषः | कुरुषे | कुर्वाथे | कुरुध्वे |
| उत्तमपुरुषः | कुर्वे | कुर्वहे | कुर्महे |

## कृ (करना) आत्मनेपदी "लोट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुरुताम् | कुर्वाताम् | कुर्वताम् |
| मध्यमपुरुषः | कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| उत्तमपुरुषः | करवै | करवावहै | करवामहै |

## कृ (करना) आत्मनेपदी "लङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकुरुत | अकुर्वाताम् | अकुर्वत |
| मध्यमपुरुषः | अकुरुथाः | अकुर्वाथाम् | अकुरुध्वम् |
| उत्तमपुरुषः | अकुर्वि | अकुर्वहि | अकुर्महि |

## कृ (करना) आत्मनेपदी "विधिलिङ्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्वीत | कुर्वीयाताम् | कुर्वीरन् |
| मध्यमपुरुषः | कुर्वीथाः | कुर्वीयाथाम् | कुर्वीध्वम् |
| उत्तमपुरुषः | कुर्वीय | कुर्वीवहि | कुर्वीमहि |

## कृ (करना) आत्मनेपदी "लृट्" लकार:

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यते | करिष्येते | करिष्यन्ते |
| मध्यमपुरुषः | करिष्यसे | करिष्येथे | करिष्यध्वे |
| उत्तमपुरुषः | करिष्ये | करिष्यावहे | करिष्यामहे |

## हृ (हरना) "लट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरति | हरत: | हरन्ति |
| मध्यमपुरुष: | हरसि | हरथ: | हरथ |
| उत्तमपुरुष: | हरामि | हराव: | हराम: |

## हृ (हरना) "लोट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरतु | हरताम् | हरन्तु |
| मध्यमपुरुष: | हर | हरतम् | हरत |
| उत्तमपुरुष: | हराणि | हराव | हराम |

## हृ (हरना) "लङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अहरत् | अहरताम् | अहरन् |
| मध्यमपुरुष: | अहर: | अहरतम् | अहरत |
| उत्तमपुरुष: | अहरम् | अहराव | अहराम |

## हृ (हरना) "विधिलिङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरेत् | हरेताम् | हरेयु: |
| मध्यमपुरुष: | हरे: | हरेतम् | हरेत |
| उत्तमपुरुष: | हरेयम् | हरेव | हरेम |

## हृ (हरना) "लृट् " लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरिष्यति | हरिष्यत: | हरिष्यन्ति |
| मध्यमपुरुष: | हरिष्यसि | हरिष्यथ: | हरिष्यथ |
| उत्तमपुरुष: | हरिष्यामि | हरिष्याव: | हरिष्याम: |

## हृ (चुराना/ले जाना) "लट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरते | हरेते | हरन्ते |
| मध्यमपुरुष: | हरसे | हरेथे | हरध्वे |
| उत्तमपुरुष: | हरे | हरावहे | हरामहे |

## हृ (चुराना/ले जाना) "लोट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरताम् | हरेताम् | हरन्ताम् |
| मध्यमपुरुष: | हरस्व | हरेथाम् | हरध्वम् |
| उत्तमपुरुष: | हरै | हरावहै | हरामहै |

## हृ (चुराना/ले जाना) "लङ्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अहरत | अहरेताम् | अहरन्त |
| मध्यमपुरुष: | अहरथा: | अहरेथाम् | अहरध्वम् |
| उत्तमपुरुष: | अहरे | अहरावहि | अहरामहि |

## हृ (चुराना/ले जाना) "विधिलिङ्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरेत | हरेयाताम् | हरेरन् |
| मध्यमपुरुष: | हरेथा: | हरेयाथाम् | हरेध्वम् |
| उत्तमपुरुष: | हरेय | हरेवहि | हरेमहि |

## हृ (चुराना/ले जाना) "लृट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | हरिष्यते | हरिष्येते | हरिष्यन्ते |
| मध्यमपुरुष: | हरिष्यसे | हरिष्येथे | हरिष्यध्वे |
| उत्तमपुरुष: | हरिष्ये | हरिष्यावहे | हरिष्यामहे |

## क्री (मोल लेना) "लट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | क्रीणाति | क्रीणीत: | क्रीणन्ति |
| मध्यमपुरुष: | क्रीणासि | क्रीणीथ: | क्रीणीथ |
| उत्तमपुरुष: | क्रीणामि | क्रीणीव: | क्रीणीम: |

## क्री (मोल लेना) "लोट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | क्रीणातु | क्रीणीताम् | क्रीणन्तु |
| मध्यमपुरुष: | क्रीणीहि | क्रीणीतम् | क्रीणीत |
| उत्तमपुरुष: | क्रीणानि | क्रीणाव | क्रीणाम |

## क्री (मोल लेना) "लङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अक्रीणात् | अक्रीणीताम् | अक्रीणन् |
| मध्यमपुरुष: | अक्रीणा: | अक्रीणीतम् | अक्रीणीत |
| उत्तमपुरुष: | अक्रीणाम् | अक्रीणीव | अक्रीणीम |

## क्री (मोल लेना) 'विधिलिङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | क्रीणीयात् | क्रीणीयाताम् | क्रीणीयु: |
| मध्यमपुरुष: | क्रीणीया: | क्रीणीयातम् | क्रीणीयात |
| उत्तमपुरुष: | क्रीणीयाम् | क्रीणीयाव | क्रीणीयाम |

## क्री (मोल लेना) "लृट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | क्रेष्यति | क्रेष्यत: | क्रेष्यन्ति |
| मध्यमपुरुष: | क्रेष्यसि | क्रेष्यथ: | क्रेष्यथ |
| उत्तमपुरुष: | क्रेष्यामि | क्रेष्याव: | क्रेष्याम: |

## क्री (मोल लेना) "लट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणीते | क्रीणाते | क्रीणते |
| मध्यमपुरुषः | क्रीणीषे | क्रीणाथे | क्रीणीध्वे |
| उत्तमपुरुषः | क्रीणे | क्रीणीवहे | क्रीणीमहे |

## क्री (मोल लेना) "लोट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणीताम् | क्रीणाताम् | क्रीणताम् |
| मध्यमपुरुषः | क्रीणीष्व | क्रीणाथाम् | क्रीणीध्वम् |
| उत्तमपुरुषः | क्रीणै | क्रीणावहै | क्रीणामहै |

## क्री (मोल लेना) "लङ्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अक्रीणीत | अक्रीणाताम् | अक्रीणत |
| मध्यमपुरुषः | अक्रीणाथाः | अक्रीणाथाम् | अक्रीणीध्वम् |
| उत्तमपुरुषः | अक्रीणि | अक्रीणीवहि | अक्रीणीमहि |

## क्री (मोल लेना) "विधिलिङ्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणीत | क्रीणीयाताम् | क्रीणीरन् |
| मध्यमपुरुषः | क्रीणीथाः | क्रीणीयाथाम् | क्रीणीध्वम् |
| उत्तमपुरुषः | क्रीणीय | क्रीणीवहि | क्रीणीमहि |

## क्री (मोल लेना) "लृट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रेष्यते | क्रेष्येते | क्रेष्यन्ते |
| मध्यमपुरुषः | क्रेष्यसे | क्रेष्येथे | क्रेष्यध्वे |
| उत्तमपुरुषः | क्रेष्ये | क्रेष्यावहे | क्रेष्यामहे |

## शक् (शकना) "लट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | शक्नोति | शक्नुत: | शक्नुवन्ति |
| मध्यमपुरुष: | शक्नोषि | शक्नुथ: | शक्नुथ |
| उत्तमपुरुष: | शक्नोमि | शक्नुव: | शक्नुम: |

## शक् (शकना) "लङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अशक्नोत् | अशक्नुताम् | अशक्नुवन् |
| मध्यमपुरुष: | अशक्नो: | अशक्नुतम् | अशक्नुत |
| उत्तमपुरुष: | अशक्नुवम् | अशक्नुव | अशक्नुम |

## शक् (शकना) "लृट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | शक्ष्यति | शक्ष्यत: | शक्ष्यन्ति |
| मध्यमपुरुष: | शक्ष्यसि | शक्ष्यथ: | शक्ष्यथ |
| उत्तमपुरुष: | शक्ष्यामि | शक्ष्याव: | शक्ष्याम: |

## शक् (शकना) "लोट्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | शक्नोतु | शक्नुताम् | शक्नुवन्तु |
| मध्यमपुरुष: | शक्नुहि | शक्नुतम् | शक्नुत |
| उत्तमपुरुष: | शक्नवानि | शक्नवाव | शक्नवाम |

## शक् (शकना) "विधिलिङ्" लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | शक्नुयात् | शक्नुयाताम् | शक्नुयु: |
| मध्यमपुरुष: | शक्नुया: | शक्नुयातम् | शक्नुयात |
| उत्तमपुरुष: | शक्नुयाम् | शक्नुयाव | शक्नुयाम |

## ग्रह् (पकड़ना) "लट्" लकारः (परस्मैपद)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णाति | गृह्णीतः | गृह्णन्ति |
| मध्यमपुरुषः | गृह्णासि | गृह्णीथः | गृह्णीथ |
| उत्तमपुरुषः | गृह्णामि | गृह्णीवः | गृह्णीमः |

## ग्रह् (पकड़ना) "लोट्" लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णातु | गृह्णीताम् | गृह्णन्तु |
| मध्यमपुरुषः | गृहाण | गृह्णीतम् | गृह्णीत |
| उत्तमपुरुषः | गृह्णानि | गृह्णाव | गृह्णाम |

## ग्रह् (पकड़ना) "लङ्" लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगृह्णात् | अगृह्णीताम् | अगृह्णन् |
| मध्यमपुरुषः | अगृह्णाः | अगृह्णीतम् | अगृह्णीत |
| उत्तमपुरुषः | अगृह्णाम् | अगृह्णीव | अगृह्णीम |

## ग्रह् (पकड़ना) "विधिलिङ्' लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णीयात् | गृह्णीयाताम् | गृह्णीयुः |
| मध्यमपुरुषः | गृह्णीयाः | गृह्णीयातम् | गृह्णीयात |
| उत्तमपुरुषः | गृह्णीयाम् | गृह्णीयाव | गृह्णीयाम |

## ग्रह् (पकड़ना) "लृट्" लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ग्रहीष्यति | ग्रहीष्यतः | ग्रहीष्यन्ति |
| मध्यमपुरुषः | ग्रहीष्यसि | ग्रहीष्यथः | ग्रहीष्यथ |
| उत्तमपुरुषः | ग्रहीष्यामि | ग्रहीष्यावः | ग्रहीष्यामः |

## ग्रह् (पकड़ना) "लट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णीते | गृह्णाते | गृह्णते |
| मध्यमपुरुषः | गृह्णीषे | गृह्णाथे | गृह्णीध्वे |
| उत्तमपुरुषः | गृह्णे | गृह्णीवहे | गृह्णीमहे |

## ग्रह् (पकड़ना) "लोट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णीताम् | गृह्णाताम् | गृह्णताम् |
| मध्यमपुरुषः | गृह्णीष्व | गृह्णाथाम् | गृह्णीध्वम् |
| उत्तमपुरुषः | गृह्णै | गृह्णावहै | गृह्णामहै |

## ग्रह् (पकड़ना) "लङ्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगृह्णीत | अगृह्णाताम् | अगृह्णत |
| मध्यमपुरुषः | अगृह्णीथाः | अगृह्णाथाम् | अगृह्णीध्वम् |
| उत्तमपुरुषः | अगृह्णि | अगृह्णीवहि | अगृह्णीमहि |

## ग्रह् (पकड़ना) "विधिलिङ्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गृह्णीत | गृह्णीयाताम् | गृह्णीरन् |
| मध्यमपुरुषः | गृह्णीथाः | गृह्णीयाथाम् | गृह्णीध्वम् |
| उत्तमपुरुषः | गृह्णीय | गृह्णीवहि | गृह्णीमहि |

## ग्रह् (पकड़ना) "लृट्" लकारः (आत्मनेपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ग्रहीष्यते | ग्रहीष्येते | ग्रहीष्यन्ते |
| मध्यमपुरुषः | ग्रहीष्यसे | ग्रहीष्येथे | ग्रहीष्यध्वे |
| उत्तमपुरुषः | ग्रहीष्ये | ग्रहीष्यावहे | ग्रहीष्यामहे |

## ज्ञा (जानना) "लट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानाति | जानीत: | जानन्ति |
| मध्यमपुरुष: | जानासि | जानीथ: | जानीथ |
| उत्तमपुरुष: | जानामि | जानीव: | जानीम: |

## ज्ञा (जानना) "लोट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानातु | जानीताम् | जानन्तु |
| मध्यमपुरुष: | जानीहि | जानीतम् | जानीत |
| उत्तमपुरुष: | जानानि | जानाव | जानाम |

## ज्ञा (जानना) "लङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अजानात् | अजानीताम् | अजानन् |
| मध्यमपुरुष: | अजाना: | अजानीतम् | अजानीत |
| उत्तमपुरुष: | अजानाम् | अजानीव | अजानीम |

## ज्ञा (जानना) "विधिलिङ्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानीयात् | जानीयाताम् | जानीयु: |
| मध्यमपुरुष: | जानीया: | जानीयातम् | जानीयात |
| उत्तमपुरुष: | जानीयाम् | जानीयाव | जानीयाम |

## ज्ञा (जानना) "लृट्" लकार: (परस्मैपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | ज्ञास्यति | ज्ञास्यत: | ज्ञास्यन्ति |
| मध्यमपुरुष: | ज्ञास्यसि | ज्ञास्यथ: | ज्ञास्यथ |
| उत्तमपुरुष: | ज्ञास्यामि | ज्ञास्याव: | ज्ञास्याम: |

## ज्ञा (जानना) "लट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानीते | जानाते | जानते |
| मध्यमपुरुष: | जानीषे | जानाथे | जानीध्वे |
| उत्तमपुरुष: | जाने | जानीवहे | जानीमहे |

## ज्ञा (जानना) "लोट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानीताम् | जानाताम् | जानताम् |
| मध्यमपुरुष: | जानीष्व | जानाथाम् | जानीध्वम् |
| उत्तमपुरुष: | जानै | जानावहै | जानामहै |

## ज्ञा (जानना) "लङ्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अजानीत | अजानाताम् | अजानत |
| मध्यमपुरुष: | अजानीथा: | अजानाथाम् | अजानीध्वम् |
| उत्तमपुरुष: | अजानि | अजानीवहि | अजानीमहि |

## ज्ञा (जानना) "विधिलिङ्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | जानीत | जानीयाताम् | जानीरन् |
| मध्यमपुरुष: | जानीथा: | जानीयाथाम् | जानीध्वम् |
| उत्तमपुरुष: | जानीय | जानीवहि | जानीमहि |

## ज्ञा (जानना) "लृट्" लकार: (आत्मनेपदी)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | ज्ञास्यते | ज्ञास्येते | ज्ञास्यन्ते |
| मध्यमपुरुष: | ज्ञास्यसे | ज्ञास्येथे | ज्ञास्यध्वे |
| उत्तमपुरुष: | ज्ञास्ये | ज्ञास्यावहे | ज्ञास्यामहे |

# कारक (उपपद-विभक्तिः)

विभक्तिः द्विविधा भवति कारकोपपदभेदात्। तत्र कारकविभक्तिस्तु कारकसूचिता। विशेषशब्दैः सह विशेष विभक्तीनां प्रयोगः उपपदः विभक्तिः इति। अथ उपपद विभक्तीनां विवेचनं क्रियते-

## द्वितीया विभक्तिः

(अभितः, उभयतः, परितः, समया, निकषा, प्रति, धिक् , विना-एतेषां शब्दानां प्रयोगे द्वितीया स्यात्।)

| | | |
|---|---|---|
| अभितः/उभयतः (दोनों ओर के अर्थ में) | - | पथम् अभितः/उभयतः भवनानि सन्ति। |
| परितः (चारों ओर के अर्थ में) | - | शशाङ्कं परितः ताराः वर्तन्ते। |
| समया/निकषा (समीप के अर्थ में) | - | ग्रामं समया/निकषा नदी प्रवहति। |
| प्रति (की ओर के अर्थ में) | - | सः पाटलीपुत्रं प्रति गच्छति। |
| धिक् (तिरस्कार के अर्थ में) | - | अशिक्षितम् धिक्। |
| विना (रहित के अर्थ में ) | - | ज्ञानम् विना मानवः पशुवत् अस्ति। |

## तृतीया विभक्तिः

(विना, अलम्, सह, हीनः-एतेषां शब्दानां प्रयोगे तृतीया स्यात्।)

| | | |
|---|---|---|
| विना (अभाव के अर्थ में) | - | जलेन विना जीवनम् नास्ति। |
| अलम् (वारण के अर्थ में) | - | अलम् श्रमेण। अलम् विवादेन। |
| सह (साथ के अर्थ में) | - | शिक्षकैः सह छात्राः भोपालं गच्छन्ति। |
| हीनः (रहित के अर्थ में) | - | विद्यया हीनः पुरुषः न पूज्यते। |

## चतुर्थी विभक्तिः

(नमः, स्वस्ति, स्वाहा, अलम्, रुच्, दा, क्रुध्, स्पृह्, असूय्-एतेषां शब्दानां प्रयोगे चतुर्थी स्यात्।)

| | | |
|---|---|---|
| नमः (नमस्कार के अर्थ में) | - | हरये नमः। |
| स्वस्ति (कल्याण के अर्थ में) | - | प्रजाभ्यः स्वस्ति। |
| स्वाहा (देव को उद्देश्य करके देने के अर्थ में) | - | अग्नये स्वाहा। |
| अलम् (पर्याप्त के अर्थ में) | - | भीमः दुर्योधनाय अलम्। |
| रुच् (अच्छा लगने के अर्थ में) | - | बालकाय मोदकम् रोचते। |

| | | |
|---|---|---|
| दा (देने के अर्थ में) | - | भिक्षुकाय भिक्षां ददातु। |
| क्रुध् (क्रोध के अर्थ में) | - | शिक्षक: मूर्खाय क्रुध्यति। |
| स्पृह् (चाहने के अर्थ में) | - | माता पुत्राय स्पृहयति। |
| असूय् (निन्दा के अर्थ में) | - | प्रजा: नृपाय असूयन्ति। |

## पञ्चमी विभक्ति:

(वहि:, विना, भी, आ-रम्, प्र-मद, पर:, पूर्वम्, अनन्तरम्, अध:-एतेषां शब्दानां प्रयोगे पञ्चमी स्यात्।)

| | | |
|---|---|---|
| वहि: (बाहर के अर्थ में) | - | नगरात् वहि: वनम् अस्ति। |
| विना (रहित के अर्थ में) | - | धनात् विना भौतिकसुखं नास्ति। |
| भी (भय के अर्थ में) | - | वनचर: सिंहात् विभेति। |
| आ-रम् (प्रारम्भ होने के अर्थ में) | - | विद्यालय: सप्तवादनात् आरभ्यते। |
| प्र-मद् (आलस्य के अर्थ में) | - | अधर्मी धर्मात् प्रमाद्यति। |
| पर: (अन्य के अर्थ में) | - | ईश्वरात् परं न कोऽपि। |
| पूर्वम् (पहले के अर्थ में) | - | ग्रामात् पूर्वं तड़ाग: अस्ति। |
| अनन्तरं (पश्चात् के अर्थ में) | - | निशाया: अनन्तरं दिनं भवति। |
| अध: (नीचे के अर्थ में) | - | ईश्वरात् अध: सर्व: संसार: चलति। |
| तरप् (उसकी अपेक्षा के अर्थ में) | - | शिशो: किशोर: गुरुतर: भवति। |

## षष्टी विभक्ति:

(निर्धारणे, पुरत:, पृष्ठत:, वामत:, दक्षिणत:, अनादरे, तमप्-एतेषां प्रयोगे षष्ठी स्यात्।)

| | | |
|---|---|---|
| निर्धारणम् (छांटने के अर्थ में) | - | कवीनां कालिदास: श्रेष्ठ: अस्ति। |
| पुरत: (सामने के अर्थ में) | - | मम पुरत: शिक्षक: पाठयति। |
| पृष्ठत: (पीछे के अर्थ में) | - | भवनस्य पृष्ठत: सीता आगच्छति। |
| वामत: (बाई ओर के अर्थ में) | - | शिवस्य वामत: पार्वती तिष्ठति। |
| दक्षिणत: (दाई ओर के अर्थ में) | - | विद्यालयस्य दक्षिणत: देवालय: अस्ति। |
| अनादरे (अनादर के अर्थ में) | - | गुरुजनस्य अनादरं मा कुरु। |
| तमप् (सर्वश्रेष्ठ के अर्थ में) | - | नदीनां गङ्गा श्रेष्ठतमा अस्ति। |

## सप्तमी विभक्तिः

(कुशलः, निपुणः, प्रवीणः, स्निह, विश्वस, अनु-रज्, भावे, तरप्, तमप्-एतेषां प्रयोगे सप्तमी विभक्तिः भवति।)

| | | |
|---|---|---|
| कुशलः (दक्ष के अर्थ में) | - | सः क्रिकेटक्रीडायां कुशलः अस्ति। |
| निपुणः (दक्ष के अर्थ में) | - | सः काव्यलेखने निपुणः अस्ति। |
| प्रवीणः (चतुर के अर्थ में) | - | सज्जीवकपूरः पाककार्ये प्रवीणः अस्ति। |
| स्निह् (स्नेह करने के अर्थ में) | - | माता पुत्रे स्निह्यति। |
| विश्वस् (विश्वास करने के अर्थ में) | - | असत्यवादिनि कोऽपि न विश्वसिति। |
| अनु-रज् (अनुराग के अर्थ में) | - | धर्मे अनुरागं दृष्ट्वा मनः प्रसीदति। |
| भावे (होने पर/करने पर के अर्थ में) | - | प्रेमे सति (भावे) सर्वं सुखदायकं भवति। |
| तरप् (किसी अपेक्षा से के अर्थ में) | - | नगरेषु भोपालपुरं गुरुतरं। |
| तमप् (सर्वश्रेष्ठ के अर्थ में) | - | पर्वतेषु हिमालयः उच्चतमः वर्तते। |

निम्नाङ्कितोपपदविभक्तीनां काञ्चित् वाक्यान् अवबोधनार्थं अवलोकयतु।

| | अशुद्धं | शुद्धं |
|---|---|---|
| 1. | हरिः बैकुण्ठे आवसति। | (बैकुण्ठम्) |
| 2. | लोकस्य उपर्युपरि शम्भूः अस्ति। | (लोकम्) |
| 3. | अधोऽधः लोकस्य। | (लोकम्) |
| 4. | भूपतिः सिंहसने अध्यास्ते। | (सिंहासनम्) |
| 5. | मुनिः शिलायाम् अधिशेते। | (शिलाम्) |
| 6. | शिशुः पादस्य खञ्जः अस्ति। | (पादेन) |
| 7. | बालकं ज्ञानं ददाति। | (बालकाय) |
| 8. | अध्ययनम् गच्छति। | (अध्यनाय) |
| 9. | शिक्षकः छात्रम् धर्ममुपदिशति। | (छात्राय) |
| 10. | पापेन निवारयति। | (पापात्) |
| 11. | पापैः जुगुप्सते। | (पापात्) |
| 12. | हिमालयेन गङ्गा प्रभवति। | (हिमालयात्) |
| 13. | आसनं शोभते शिक्षकः। | (आसने) |
| 14. | कथं माम् अस्मिन् पापकर्म नियुक्ते भवान्। | (पापकर्मणि) |
| 15. | रूपेषु राममनुहरति। | (रूपेण) |

# वाच्य-परिवर्तनम् (लट्-लकारे)

वाच्य- वाक्यरचना-शैली इति वाच्यम्। वाच्यं त्रिविधं-कर्तृवाच्यम्, कर्मवाच्यम् भाववाच्यञ्च।

कर्तृवाच्यम् - कर्ता प्रधानम् कर्तृवाच्यम्। कर्तृवाच्ये कर्त्तरि प्रथमा विभक्तिः कर्मणि च द्वितीया विभक्तिः भवति तथा कर्तुः अनुसारं क्रिया भवति।

यथा - रामः पाठं पठति।

कर्मवाच्यम् - कर्म प्रधानम् कर्मवाच्यम्। कर्मवाच्ये कर्मणि प्रथमा कर्तरि च तृतीया विभक्तिः भवति। तथा कर्मणः अनुसारं क्रिया भवति।

यथा - रामेण पाठः पठ्यते।

भाववाच्यम् - अकर्मधातुषु भाववाच्यम् भवति। अत्र कर्तरि तृतीया तथा क्रिया प्रथमपुरुषे एक वचने भवति।

यथा- रामेण सुप्यते।

| | कर्तृवाच्यम् (सकर्म धातुषु) | कर्मवाच्यम् |
|---|---|---|
| 1. | मनीषः विद्यालयं गच्छति। | मनीषेण विद्यालयः गम्यते। |
| 2. | नरेन्द्रः लेखं लिखति। | नरेन्द्रेण लेखः लिख्यते। |
| 3. | अनिकेतः गृहं गच्छति। | अनिकेतेन गृहं गम्यते। |

| | कर्तृवाच्यम् (अकर्मधातुषु) | भाववाच्यम् |
|---|---|---|
| 1. | प्रत्युषः हसन्ति। | प्रत्युषेण हस्यते। |
| 2. | पङ्कजः शेते। | पङ्कजेन शीयते। |
| 3. | सः भवति। | तेन भूयते। |

## अव्ययपरिचयः

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

यत् त्रिषु लिङ्गेषु, सर्वेषु वचनेषु सर्वासु विभक्तिषु च समानं भवति, तद् अव्ययं कथ्यते ।

| | | |
|---|---|---|
| पुनः (फिर से) | - | अहम् पुनः आगमिष्यामि । |
| उच्चैः (ऊँचा) | - | सर्वेजनाः उच्चैः स्वरैः वदन्तु । |
| नीचैः (नीचा) | - | नीचैः जलम् पतत्येव । |
| शनैः (धीरे) | - | शनैः भोजनं खादितव्यम् । |
| अधः (नीचे) | - | पुण्यात्मा अधो न गच्छति । |
| चिरम् (बहुत समय) | - | सत्येन सेवया च महापुरुषः चिरं जीवति । |
| पुरा (पूर्व में) | - | पुरा राजाहरिश्चन्द्रः अभवत् । |
| मुहुः (बार-बार) | - | अहम् मुहुः मुहुः देवालयं गच्छामि । |
| ह्यः (बीता हुआ कल) | - | ह्यः अहम् विद्यालयं न गतवान् । |
| श्वः (आने वाला कल) | - | श्वः मम परीक्षा भविष्यति । |
| अद्य (आज) | - | अद्य सोमवासरः अस्ति । |
| अधुना (अभी) | - | अधुना अध्ययनस्य समयः अस्ति । |
| कुत्र (कहाँ) | - | त्वं कुत्र गच्छसि ? |
| यत्र-तत्र (जहाँ-तहाँ) | - | यत्र संस्कृतम् अस्ति तत्र संस्कृतिः अस्ति । |
| सर्वत्र (सब जगह) | - | सर्वत्र वायुः वहति । |
| यदा (जब) | - | यदा कमलानि विकसन्ति, तदा भ्रमराः आगच्छन्ति । |
| सर्वदा (हमेशा) | - | सर्वदा सत्यं वदेत् । |
| उपरि (ऊपर) | - | उपरि ईश्वरः इति मन्यते । |
| मा (नहीं) | - | मा वद मिथ्या । |
| यथा-तथा (जैसा-वैसा) | - | यथा राजा तथा प्रजा । |
| अपि (भी) | - | अहम् अपि गमिष्यामि । |
| विना (रहित) | - | अग्निं विना धूमः न भवति । |
| सह (साथ) | - | रामेण सह सीता वनं अगच्छत् । |
| अधि (अधिक/विशिष्ट) | - | राजा परराज्यम् अधिकरोति । |
| | | रावणः स्वर्गं अधिकरोति । |
| प्रति (की ओर) | - | विद्यालयं प्रति सर्वे छात्राः गच्छन्ति । |

# संस्कृतसाहित्य-परिचयः

## वेदः

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्। प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव। ब्राह्मणग्रन्थोऽपि त्रिधा-ब्राह्मणम्, आरण्यकम्, उपनिषदश्च।

- यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः, अयम् च गृहस्थानामुपयोगी।
- यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागाः आरण्यकानि, अयं च वानप्रस्थमाश्रितानाम्।
- उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, अयं च सन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते।

## उपनिषद्

उपनिषच्छब्दस्य रहस्यमर्थः, अध्यात्मविद्यारहस्यप्रतिपादकाः वेदभागाः उपनिषदः कथ्यन्ते। मुक्तिकोपनिषदि उपनिषदां संख्या 108 कथिता। तत्र 10 ऋग्वेदसम्बद्धाः, 19 शुक्लयजुर्वेद-सम्बद्धाः, 32 कृष्णयजुर्वेदसम्बद्धाः, 16 सामवेदसम्बद्धाः, 31 अथर्ववेदसम्बद्धाः। कतिचन गद्यात्मिकाः कतिचन पद्यात्मिकाः कतिचन गद्यपद्योभयात्मिकाश्च।

## पुराणानि

वेदविहितानां धर्माणां सरलसुबोध भाषायां वर्णनायैव पुराणानि विरचितानि। पुराणानां धार्मिकदृष्ट्या महत्वमधिकम्। पुराणानि राज्ञां वृत्तैः सह ऋषीणामपि वृत्तं वोधयन्ति। पुराणानि भौगोलिकसामग्रीम् अपि प्रस्तुवन्ति। पुराणेषु अतिशयोक्तिपूर्णा शैलीसमादृता येन लोकास्तानि अविश्वसनीयानि काल्पनिकानि च इति जानन्ति स्म। अष्टादशपुराणानां नामानि-मत्स्यपुराणम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, भागवतपुराणम्, ब्रह्माण्डपुराणम्,, ब्रह्मपुराणम्, ब्रह्मवैवर्त्तपुराणम्, वामनपुराणम्, वराह पुराणम्, विष्णुपुराणम्, वायुपुराणम्, अग्निपुराणम्, नारदपुराणम्, पद्मपुराणम्, लिङ्गपुराणम्, गरुडपुराणम्, कूर्मपुराणम्, स्कन्दपुराणम्।

## स्मृतयः

स्मृतयः धर्मशास्त्रम् आचारशास्त्रम् वा कथ्यन्ते। स्मृतिषु राज्ञां प्रजानां च अधिकारो कर्त्तव्यस्य च सामाजिक-आचार-विचार-व्यवस्थायाः, वर्णाश्रमधर्मस्य-नीतेः-सदाचारस्य-शासन-प्रशासनस्य च नियमानां वर्णनम् अस्ति।

पुराणानानि स्मृतयः अपि अष्टादश सन्ति। तेषां नामानि निर्मातृणामुपरि एव। तद्यथा-मनु-याज्ञवल्क्य-अत्रि-विष्णु-हारीत-उशनस्-अङ्गिरा-यम-कात्यायन-वृहस्पति-पराशर-व्यास-दक्ष-गौतम-वशिष्ठ-नारद-भृगु-अङ्गिरा स्मृतयः।

## रामायणम्

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिध्यति। रामायणात् प्राचीनः संस्कृतभाषायां काव्यलक्षणोपपन्नः कोऽपि ग्रन्थो नास्ति, अतः भारतीयैः रामायणमादिकाव्यं वाल्मिकिश्च आदिकविरभिधीयते। रामयणे न केवलं वीरगाथामात्रम् न वा शुष्केतिहासमात्रम् युद्धमेव वर्णितमपितु रूपकोपमाद्यलङ्कारयुतायां भाषायां प्रकृतेरपि वर्णनं कृतमतो रामायणं काव्यमिति स्वीक्रियते। रामायणे चतुर्विंशतिः सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्री संहितापदेनाभिधीयते।

## महाभारतम्

मनुनाम्नाऽपि व्यवहारविषयतां गतोऽयं ग्रन्थो महाभारतमिति संज्ञा स्वीकृता।

प्रथम महाभारतमितिहासः पुराणमाख्यानकञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रं धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनं मन्यन्ते। भारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम्। महाभारतस्य अशीतिप्रतिशतभागोऽनेक विधोपदेशमयः विंशतिप्रतिशतभाग एवेतिहासप्रतिपादक इति अस्य नीतिशास्त्रेषु गणनोचिता। महाभारतं तदानीन्तनीं भारतीयां सभ्यतां प्रकाशयति। महाभारतमष्टादशसु पर्वसु विभक्तं वर्त्तते।

युद्धवर्णनमात्रं न व्यासस्य लक्ष्यमपितु भौतिकजीवनस्यासारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्त्तनमेव व्यासस्य महाभारत प्रणयने उद्देश्यमासीत्। अतएवात्र शान्तो रसः प्रधानभूतः वीरस्तु रसोऽङ्गभावं गतः।

## गद्यकाव्यम्

संस्कृते गद्यसाहित्यं परप्रकर्षम्। वेदकालेऽपि गद्यस्य प्रयोगः प्रचुरप्रचार आसीत्। संहिताग्रन्थेषु गद्यस्य भूयसी मात्राऽवाप्यते। अथर्ववेदस्य गद्यवहुलता सुप्रतीता। गद्यं साहित्ये प्रयुज्यमानं सदैव गद्यकाव्यनामकं काव्यस्य भेदमकल्पयत्। साहित्यप्रयोगश्च गद्यस्य शिलालेखेष्वेवेदं प्रथमतया कृतः प्रतीयते।

गद्यस्य साहित्यिकं स्वरूपं प्रकटीकृत्यात्मानं गौरवान्वितं कृतवत्सु कविषु प्रमुखकवयः-सुबन्धुः, बाणभट्टः, दण्डी, धनपालः।

## पद्यकाव्यम्

संस्कृते गद्यसाहित्यमिव पद्यसाहित्यं परप्रकर्षम्। पद्यकाव्यं प्राचीनकालतः एव सुप्रसिद्धकाव्यं वर्तते। पद्यं प्रति लेखकानामादरातिशयेन आयुर्वेदज्योतिषादि वैज्ञानिकग्रन्थेषु गद्यापेक्षया पद्यस्य मात्रा अधिकतमा। पद्यमयं हि ग्रन्थं पाठकाः सुखमभ्यस्यन्ति, कण्ठे स्थापयन्ति चेति। पद्यमयो ग्रन्थस्तालयाश्रिततया रोचकः प्रचारोपयुक्तश्च भवति। धिया च पद्यं भूयसा प्रायुज्यत।

पद्यसाहित्यिकं स्वरूपं ये कवयः सन्ति तेषु प्रमुखाः वाल्मीकिः व्यासः कालिदासः अश्वघोषः भासः, भवभूतिः भारविः, इत्यादयः।

## चम्पूकाव्यम्

गद्यकाव्यगतमर्थगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृतं रागमयत्वं चेत्युभयं मिलितं सदधिकं चमत्कारं जनयेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते ।

गद्यसम्बन्धेन पद्यानि तथैवानन्ददायकानि जायन्ते यथा वाद्ययन्त्रैरुपेतानि गायनानि ।

दण्डिनाकथितम् - गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते ।

अन्य च - गद्यपद्यमयं काव्यं चम्पूः ।

चम्पूकाव्येषु तु गद्यपद्ययोर्मात्रा प्रायेण समाभवति ।

आर्यसूरिकृता जातकमाला एव चम्पूकाव्यस्यादीमं स्रोत इति मन्यते ।

| | **भोजस्य** | | **रामायणचम्पू** |
|---|---|---|---|
| अन्यः च - | त्रिविक्रमभट्टस्य | - | 'नलचम्पूः' |
| | सोमप्रभसूरे | - | 'यशस्तिलकचम्पूः' |
| | हरिचन्द्रस्य | - | 'जीवन्धरचम्पूः' |

## नाटकम्

'प्राकृतिकपरिवर्तनानां मूर्त्तं रूपं साधारणजनसमक्षमवतारयितुमेव नाटकानामुदयो जातः' इति डॉ.कीथमहोदयः कथितवान्।

अन्यत्र - पुत्तलिकानृत्यमूलं नाटकानामुदयम् ।

संस्कृतनाटककारेषु-भासः, कालिदासः, अश्वघोषः, विशाखदत्तः, भवभूतिः, हर्षवर्द्धनः, शूद्रकः इत्यादयः ।

संस्कृतसाहित्ये प्रमुखनाटकानि -अभिज्ञानशाकुन्तलम्, मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम्, मुद्राराक्षसम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् आदयः ।

## नाट्यतत्त्वानि

''अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपात् दशधैव रसाश्रयम् ॥''

नाट्यभेदाः-

''नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥''

अनुकारात्मकत्वेन रूपाणामभेदात्कृतो भेद इत्याशङ्कयाह- ''वस्तु नेता रसस्तेषां भेदकः।''

वस्तु-

वस्तु च द्विधा।

''तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः।''

प्रधानभूतमाधिकारिकं यथा रामायणे रामसीतावृत्तान्तः, तदङ्गभूतं प्रासङ्गिकं यथा तत्रैव विभीषणसुग्रीवादिवृत्तान्त इति।

प्रासङ्गिकमपि पताकाप्रकरीभेदाद् द्विविधमित्याह- ''सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्।''

यथा रामायणे सुग्रीवस्य कथा पताका श्रमणादि वृत्तान्तः प्रकरी।

एवमाधिकारिकद्विविधप्रासङ्गिकभेदात्त्रिविधस्यापि त्रैविध्यमाह-प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रेधापि तत्त्रिधा।

प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्।

मिश्रं च सङ्करात्ताभ्यां दिव्यमर्त्यादिभेदतः॥

नेता-

रूपकाणामन्योन्यं भेदसिद्धये वस्तुभेदं प्रतिपाद्येदानीं नायकभेदः प्रतिपाद्यते-

''भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्।''

नायकस्य कृते धैर्यगुणम् परमावश्यकमस्ति अतएव नायकभेदैः सह 'धीर' इति विशेषणम् योजितम् भवति।

यथा - धीरललितः, धीरशान्तः, धीरोदात्तः, धीरोद्धतश्च।

रसः -

''विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।

आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः॥''

रसभेदाः-

''श्रृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात्।

हास्याद्भुतभयोत्कर्षकरुणानां त एव हि।

शमप्रकर्षोऽनिर्वाच्यो मुदितादेस्तदात्मता॥''

# संस्कृते पत्र-लेखनम्

संस्कृते पत्रलेखनम् प्राचीनकालतः एव प्रचलति। संदेशसम्प्रेषणे अद्यापि पत्राणां अत्यधिकं महत्त्वम् अस्ति। कार्यव्यवहारे भावप्रदर्शनस्य सशक्तमाध्यमं पत्रमेव अस्ति।

पत्रलेखनात् पूर्व सम्बोधनं कथं करणीयम् कुशलनिवदेनञ्च कथं करणीयम्। पत्रस्य आरम्भः कथं करणीयः तथा च पत्रस्य समाप्तिः कथं करणीया। एतादृशं कौशलं पत्रलेखने बहु आवश्यकम् अस्ति।

## अवकाशार्थंप्रार्थनापत्रम्

माननीयप्राचार्यमहोदयः

शासकीयसंस्कृतविद्यालयः,

विदिशा (म.प्र.)

महोदय !

सविनयम् इदं निवेदयानि। आगामिनि जनवरीमासे मम भ्रातुः विवाहोत्सवो भविष्यति। अतः अहं षड् दिनाङ्कतः द्वादश दिनाङ्कपर्यन्तं विद्यालये आगन्तुम् असमर्थः अस्मि। अतएव सप्त दिवसानाम् अवकाशं प्रार्थये।

श्रीमन्तः अवकाशप्रदानेन माम् अनुग्रहीष्यन्ति।

निवेदकः

दिनाङ्क 21/08/2007 राजेशः

## अवकाशार्थंप्रार्थनापत्रम्

श्रीमन्तःप्राचार्यमहोदयाः,

शासकीयउच्चतरमाध्यमिकविद्यालयः,

शिवपुरी।

मान्यवर !

अहमद्य दिनद्वयाद् शीतज्वरेण पीडितोऽस्मि। ज्वरतापेन भृशं कार्श्यमुपगतोऽस्मि। अतो विद्यालयमागन्तुं न शक्नोमि। कृपया दिवसद्वयस्यावकाशं स्वीकृत्य मामनुग्रहीष्यन्ति श्रीमन्तः।

भवतामाज्ञाकारी शिष्यः

अक्षतः

दिनाङ्क- 22/03/2007

## निमन्त्रणपत्रम्

श्रीमन्महोदय !

एतद् विज्ञाय नूनं भवन्तो हर्षमनुभविष्यन्ति यत् ईश्वरस्य महत्याऽनुकम्पया मम ज्येष्ठाया दुहिता-अपराजितादेव्या: शुभपाणिग्रहणसंस्कारो बडवानी-वास्तव्यस्य श्रीमतो रामचन्द्रोपाध्यायस्य ज्येष्ठपुत्रेण पीएच.डी.इत्युपाधिविभूषितेन श्रीसुरेन्द्रप्रसादोपाध्यायेन सह दिनाङ्के 1/12/2007 ईसवीये रात्रौ दशवादने सम्पत्स्यते। सर्वेऽपि भवन्त: सादरं सविनयं च प्रार्थ्यन्ते यत् सपरिवारं निर्दिष्टसमये समागत्य वरवधूयुगलं स्वाशीर्वादप्रदानेनानुग्रहीष्यन्त्यस्मान्।

भवद्दर्शनाभिलाषी

लक्ष्मीनारायणपाण्डेय:

363 'अभिवादनम्'

पञ्चवटीनगरम्, भोपालम्

दिनाङ्क 30/10/2007

## भ्रात्रे पत्रम्

गुरुकुल-महाविद्यालय-सागरत:

दिनाङ्क: 20/06/2007

प्रिय बन्धुवर बालकृष्ण !

सस्नेहं नमस्ते।

अत्र कुशलं तत्रास्तु। एतदवगत्य भवान्नूनं हर्षमनुभविष्यति यदहं संवत्सरेऽस्मिन् शास्त्रिपरीक्षामुत्तीर्ण:। तत्र च प्रथमा श्रेणि: संप्राप्ता। साम्प्रतमहं संस्कृतविषये स्नातकोत्तरपरीक्षां दित्सामि। आशासे परेशप्रसादात् तत्रापि साफल्यमाप्स्यामि। सर्वेऽपि गुरवो मयि कृपापरा:। शिष्टं विशिष्टं श्व:। परिचितेभ्यो नम:।

भवद्बन्धु:

ममलेश:

## पितु: कृते पत्रम्

(शैक्षणिकभ्रमणाय आज्ञां प्राप्तुं पितरं प्रति पत्रम्)

सान्दीपनिछात्रावास:

उमरियानगरम्

दिनाङ्क: 10/04/2007

पूजनीय: जनक:

सादरचरणस्पर्श: ।

अत्र कुशलम् तत्रास्तु । मम मासिक परीक्षा 20/04/2007 दिनाङ्के सम्पूर्णो भविष्यति । तदुपरान्तं पञ्च दिनस्य अवकाशम् भविष्यति । अस्मिन् अवकाशे मम कक्षाया: छात्रा: शैक्षिकभ्रमणे गमिष्यन्ति । अहं अपि अस्मिन् अवसरे गन्तुम् इच्छामि । एतत्कृते भवदाज्ञा अति आवश्यकी । कृपया आज्ञा ददातु भवान् इति प्रार्थना ।

भवताम् पुत्र:

विजयशर्मा

## मित्रस्य कृते पत्रम् (मित्राय भगिनीविवाहस्य निमन्त्रण-पत्रम्)

12/8, अलकनन्दानगरम्

उज्जयिनी

दिनाङ्क: 12/03/2007

प्रियमित्र अजय !

सप्रेम नमोनम: ।

अत्र कुशलम् तत्रास्तु । इदं प्रीतिदायकं वृत्तं भवन्तं सूचयित्वा अहम् अतीव आनन्दम् अनुभवामि यत् मम भगिन्या: विवाह: आगामिमासस्य दशम्यां तारिकायां, भौमवासरे निश्चित: जात: । अहं त्वां प्रेमपूर्वकं पूर्वत: एव ज्ञापयामि येन त्वम् अत्र त्रिचतुर्दिनानि पूर्वत: एव प्राप्त: स्या: । भवता पितृभ्यां सह अत्र अवश्यमेव आगन्तव्यम् । भवतां स्निग्धां सङ्गतिं साहय्यं च अहं कामये । आदरणीयाभ्यां पितृभ्यां सस्नेह नमोनम: ।

तव पत्रोत्तरं प्रतीक्षमाण: ।

तव मित्रम्

प्रत्यूष:

# लघुकथा निर्माणम्

2. कोष्ठान्तर्गतशब्दसूचीसाहाय्येन लघुकथा पूर्णा क्रियताम्-

2.1 (अ) श्यामवर्ण:, हंस:, शुभ्र:, काक:, तथापि, गङ्गायाम्, अनन्तरम्, शरीरे, मरणम्, स्वशरीरम्।

एक: काक:। एक: ...........। काक: ..........। हंस: शुभ्रवर्ण:। एकदा काक: हंस प्रति कथयति भवान् बहु-सुन्दर: अस्ति, अहम् कुरूप: अस्मि। अहमपि ........ शुभ्र: भवितुम् इच्छामि। हंस: कथयति-भवान्...... स्नानं करोतु शुभ्र: भविष्यति। काक: गच्छति गङ्गामध्ये स्नानं करोति। तथापि ...... सुन्दर: न भवति। ......... काक: पाषाणखण्डेन सह ........... घर्षयति। वारं-वारं च स्नानं करोति। पुन: पुन: घर्षयति ....... शुभ्र: न भवति। अनन्तरं .......... अतीव वेदना भवति। तत्रैव तस्य ........ भवति।

(आ) गतवान्, व्याध:, शूकरो, भूमौ, शुष्कदेशे, व्यापादितम्, निपपात।

कल्याण कटक वास्तव्यो भैरवो नाम......... आसीत्। स: मृगम् अन्विष्यमाणो विन्ध्याटवीं ......। तत: तेन ....... मृगम् आदाय गच्छता ....... दृष्ट:। तेन व्याधेन मृगं ...... निधाय शूकर: शरेण आहत:। शूकरेणापि घनघोरगर्जनं कृत्वा स व्याधो .......... हत: संश्छिन्नद्रुम इव भूमौ ......।

2.2 शब्दसूचीसाहाय्येन दशवाक्यानि कथारूपेण लिखत -

(अ) पर्वत:, चौर:, घण्टा, व्याध:, नरकङ्काल:, दानम्, दृष्ट:, राक्षस:, धनम्, स्त्री, फलानि, नागरिकै:, भक्षित:, गतवती, स्त्री।

(ब) वृक्षा:, प्राणवायु:, उपकारम्, रक्षा, जलम्, मेघम्, मरुस्थली, ईधनम्, काष्ठम्, पन्था:, छाया, फलानि, धर्मो रक्षति रक्षित:।

2.3 वार्तालापे एकपक्षपूरणं कुरुत-

- कक्षायाम् शिक्षक-छात्रयो: मध्ये वार्तालाप:। अत्र रिक्तस्थानं पूरयत।

(अ) शिक्षक: - छात्रा: ! क: पशु: सर्वश्रेष्ठ: अस्ति ?

रमेश: - महोदय ! ..................।

शिक्षक: - कथम् ?

अखिलेश: - .......... ..........।

शिक्षक: - शोभनम्, परन्तु बलेनैव कोऽपि सर्वश्रेष्ठ: न, अपितु बुद्ध्यैव श्रेष्ठ: भवति।

हितेशः - किम् बलापेक्षया बुद्धिः महत्वपूर्णा भवति ?

शिक्षकः - ........... यः .......... स एव ........... भवति।

(ब) आपणे दृष्टेन मित्रेण सह कस्यचित् सम्भाषणम् अत्र। रिक्तं स्थानं पूरयत-

पंकजः - नमस्ते संजय, बहुदिनेभ्यः कुतो न दृष्टः ? कुत्रासीत् भवान् ?

संजयः - .......... ........ ....... ।

पंकजः - एवमासीद्वा ? अहं न अजानाम्। इदानीं स्वस्थोऽसि किम् ? अधुना किं करोषि ?

संजयः - .......... ........ ....... ।

पंकजः - अहं अपि पूर्वं सङ्गणकयंत्रम् अक्रीणाम्। भवान् मम गृहे सपरिवारं आगच्छतु।

संजयः - आम्। ........... ........

पंकजः - मित्र ! आवां पुनः मिलावः।

2.4 चित्रम् अधिकृत्य निर्दिष्टशब्दसूचीसहाय्येन अनुच्छेदं कथा वा लिखत-

(नदीतीरे, जम्बूवृक्षः, वानरः, फलानि, मकरः, मित्रम्, पत्नीम्, कोटरे)



# निबन्ध-लेखनम्

## विद्या

ज्ञानार्थक 'विद्' धातोः विद्याशब्दः सिध्यति। यद्यपि संसारे बहूनि वस्तूनि सन्ति, परन्तु विद्यैव सर्वश्रेष्ठं धनमस्ति। अत एवोच्यते-'विद्याधनं सर्वधनप्रधानम्' विद्यया मनुष्यः स्वकीयं कर्त्तव्यं जानाति। विद्ययैव मनुष्यो जानाति यत् को धर्मः, कोऽधर्मः, किं कर्त्तव्यम् किमकर्त्तव्यम्, किं पुण्यम्, कि पापम्, किं कृत्वा लाभो भविष्यति, केन कार्येण वा हानिः भविष्यति। यो मनुष्यो विद्याहीनोऽस्ति स कर्त्तव्याकर्त्तव्यस्य अज्ञानेन पशुवद् आचरति, अतः स पशुरित्यभिधीयते। 'विद्याविहीनः पशुः' इति।

विद्या सर्वेषु धनेषु श्रेष्ठमस्ति, यतो हि विद्यैव व्यये कृते वर्धते। अन्यद् धनं व्यये कृते क्षयं प्राप्नोति।

विद्यया जगति मनुष्यः उन्नतिं करोति। विद्या दुःखेषु विपत्तिषु च नरस्य रक्षां करोति। विद्यैव कीर्तिं धनं च ददाति।

विद्ययैव मनुष्य सर्वत्र सम्मानं प्राप्नोति। राजानोऽपि विदुषां समक्षे पुरस्तात् नतशिरसो भवन्ति। विद्वांस एव संसारस्य दुःखानि दूरीकुर्वन्ति। विद्ययैव मोक्षप्राप्तिः भवति।

## परोपकारः

परेषाम् उपकारः परोपकारोऽस्ति। अन्येभ्यो मनुष्येभ्यो जीवेभ्यो वा तेषां हितसम्पादनार्थे यत् किञ्चिद् दीयते, तेषां साहाय्यं या क्रियते, तत् सर्वं परोपकारशब्देन गृह्यते।

संसारे परोपकार एव स गुणो विद्यते, येन मनुष्येषु जीवेषु वा सुखस्य प्रतिष्ठा वर्तते। समाजसेवाभावना, देशप्रेमभावना, देशभक्तिभावना, परदुःखकातरता, सहानुभूतिगुणस्य सत्ता च परोपकारगुणस्य ग्रहणेनैव भवति। ते दीनेभ्यो दानं ददति निर्धनेभ्यो धनम्, वस्त्रहीनेभ्यो वस्त्रम्, पिपासितेभ्यो जलम् बुभुक्षितेभ्योऽन्नम्, अशिक्षितेभ्यश्च शिक्षाम्। सज्जनाः परोपकारेणैव प्रसन्ना भवन्ति। ते परोपकरणे स्वीयं दुःखं न गणयन्ति।

प्रकृतिरपि परोपकारस्यैव शिक्षां ददाति। परोपकारार्थमेव सूर्यः तपति, चन्द्रो ज्योत्स्नां वितरति, वृक्षाः फलानि वितरन्ति, नद्यो वहन्ति, मेघाश्च वर्षन्ति। शास्त्रेषु परोपकारस्य बहुमहत्त्वं गीतमस्ति। परोपकारेणैव जगतोऽभ्युदयो भवति, शान्तिः सुखं च वर्धेते उक्तं च-

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीडनम्॥

## सदाचार:

सताम् आचार सदाचार: इत्युच्यते। सज्जना: विद्वांसो यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जना: स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वै: सह शिष्टाचारपूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातु: पितु: गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति, तेषाम् आज्ञा पालयन्ति, सत्कर्मणि प्रवृत्ता भवन्ति।

देशस्य राष्ट्रस्य समाजस्य जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जना ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धि: वर्धते सदाचारी न पापानि चिन्तयति, अत: तस्य बुद्धि: निर्मला भवति। अतएव महर्षिभि: ''आचार: परमो धर्म:'' इत्युक्तम्। संसारे सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणो भवन्ति, तै एव सर्वत्र आदरं लभन्ते। य: सदाचारेण हीनोऽस्ति स वस्तुत: पतितोऽस्ति, धनहीनो न पतितोऽस्ति।

मनुष्यस्तदा सच्चरित्रो भवति यदा सा मातृवत् परदारेषु व्यवहरति, कन्या: बालिकाश्च स्वभगिनीवत् पश्यति। यो नैवमाचरति स दुश्चरित्र: इति कथ्यते।

## कालिदास:

मम प्रिय: कवि: कालिदास: अस्ति। कविकुलशिरोमणि: महाकवि: कालिदास: संस्कृतभाषाया: श्रेष्ठतम: कवि: अस्ति। स: नाटककार: महाकाव्यनिर्माता गीतिकाव्यकर्त्ता (खण्डकाव्यकर्ता) च आसीत्। तस्य प्रमुखा: ग्रन्था: सन्ति यथा-

(अ) त्रीणि नाटकानि-मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च।

(ब) महाकाव्यद्वयम्-रघुवंशम् कुमारसम्भवम् च।

(स) गीतिकाव्यद्वयम्-मेघूदूतम् ऋतुसंहारम् च।

कालिदास: महाराजविक्रमादित्यस्य सभाकवि: आसीत्। तस्य राजधानी उज्जयिनी आसीत्। मेघदूते उज्जनिन्या: भव्यं वर्णनं विद्यते। कालिदासस्य कृतिषु कृत्रिमताया: अभाव: अस्ति।

कालिदासस्य लोकप्रियताया: कारणं तस्य प्रसादगुणयुता ललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीवरम्यम् अस्ति। चरित्रचित्रणे कालिदास: अतीव पटु: अस्ति।

कालिदास: उपमाप्रयोगे प्रसिद्ध: अस्ति यथा ''उपमा कालिदासस्य''।

## मम दिनचर्या

प्रत्येकं मानवस्य दिनचर्या पृथक् भवति। अहम् एक: छात्र: अस्मि। अहम् एकादशकक्षायाम् पठामि। अहं प्रतिदिनं प्रात: पञ्चवादने उत्तिष्ठामि। प्रात:काले अहं स्वमित्रेण ब्रजकिशोरेण सह भ्रमणाय गच्छामि। भ्रमणानन्तरम् अहं स्नानं करोमि। स्नात्वा विद्यालयं गच्छामि। विद्यालये प्रार्थना-घण्टिका भवति। सर्वे: छात्रै: सह प्रार्थनां कृत्वा स्वकक्षायाम् प्रत्यागच्छामि। तदनन्तरं कक्षायाम् अध्ययनं करोमि।

अर्द्धावकाशे मित्रेण सह भोजनं करोमि। पूर्णे अवकाशे जाते द्विचक्रिकां गृहीत्वा स्वगृहम् आगच्छामि। विश्रामं कृत्वा गृहकार्यं करोमि। सायङ्काले अहं क्रीडामि। तदा अहम् अधीतपाठानां पुन: अभ्यासं करोमि। दशवादने अहं भोजनं कृत्वा शयनाय गच्छामि। एषा भवति मम दिनचर्या।

## छात्र-जीवनम्

विद्यार्थिजीवनमेव मानवजीवनस्य प्रभातवेला आधारशिला च वर्तते। समस्तजीवनस्य विकासस्य ह्रासस्य वा कारणम् एतज्जीवनमेवास्ति। वस्तुत: विद्यार्थिजीवनं साधनामयं जीवनम्। अध्ययनं परमं तप उच्यते।

छात्रजीवने परिश्रमस्य महती आवश्यकता वर्तते। यो छात्र: आलस्यं त्यक्त्वा परिश्रमेण विद्याध्ययनं करोति स एव साफल्यं लभते। अतएव छात्रै: प्रात:काले ब्रह्ममुहूर्ते एव उत्थातव्यम्। कस्मैचित् कालाय भ्रमणमपि अनिवार्यम्। तत: प्रतिनिवृत्य स्नानसन्ध्योपासनादिकं विधाय अध्ययनं कर्त्तव्यम्। तदनन्तरं च लघु सात्विकं भोजनं दुग्धं च गृहीत्वा विद्यालयं गन्तव्यम्। तत्र गत्वा गुरुन् नत्वा अध्ययनं कर्त्तव्यम्। छात्रै: असत्यभाषणं न कदापि कर्त्तव्यम्।

विद्यार्थिजीवनं पूर्णत: अनुशासनबद्धं भवति। विद्यार्थिजीवने एव समस्तानां मानवोचितगुणानां विकासो भवति। छात्र एव राष्ट्रस्यानुपमा निधिरस्ति। अत: छात्राणां शारीरिकं चारित्रिकं च विकासं अत्यन्तानिवार्यम्। विद्यार्थिजीवनमेव सम्पूर्णागामिजीवनस्य आधारशिला। अत: तेषां सम्यक् रक्षणं, पोषणम् च कर्त्तव्यम्।

❖ ❖ ❖